1340 9''×5''

36. बौधायनोक्त-
लिङ्गस्थापन. पत्र-
(14) स०

1340

पत्र-14

यत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु १ अपक्रामंतु भूता
नि पिशाचाः सर्वतो दिशम् सर्वेषामविरोधेन वास्तु शांतिं समारभेत् २ भूतप्रेत पिशाचाद्या अपक्रा
मंतु राक्षसाः स्थानादस्माद्व्रजंत्वन्ये स्वीकरोमि भुवं त्विमाम् ३ पश्चात् पञ्चगव्य प्रोक्षणं ॐ गणानां त्वा
मिति विश्वानि देव सवितुर्दुरितानि इति स्वस्ति न इन्द्रो इति द्यौः शान्ति इत्यादि मंत्रेण

॥ अथ बौधायनोक्त लिङ्ग स्थापन प्र० ॥

प्रधान संकल्पः शुभपुण्यफलप्राप्तिकामः मम आत्मनः अशेषपापक्षयार्थं श्रुतिस्मृतिपुराणोक्त फल
प्राप्त्यर्थं अस्माकं सर्वेषां सकलकुटुम्बानां क्षेमस्थैर्यायुरारोग्यैश्वर्याद्यभिवृद्धि पूर्वक दीर्घायुर्विपुलध
न धान्य स्थिर लक्ष्मी पुत्रपौत्राद्यभिवृद्धि पूर्वक मम इह जन्मनि जन्मांतरे वा कृत कायिक वाचिक मानसिक सां
सर्गिक समस्त पापक्षयार्थं ब्राह्मणद्वारा श्रीपरमेश्वर प्रीत्यर्थं पितृतो मातृतश्च दशपूर्वान् दशापरान् पुरुषाना
त्मानं चोद्धृत्य परत्रानंत कल्प शिवलोक वासोत्तरं शिवसायुज्य मुक्ति प्राप्तये अस्यां मूर्तौ शिवलिंगे वा देवकला सा
न्निध्यार्थं यथाविभव देशकालानुसारतः अमुक मूर्ते शिवलिंगस्य वा प्रतिष्ठां करिष्ये तदंगत्वेन गणपूजनं स्वस्तिपु
ण्याहवाचनं मातृका पूजनं वसोर्धारा नांदीश्राद्ध ब्रह्माचार्यादि ऋत्विग्वरणादि दिग्रक्षणं पञ्चगव्यकरणं भूमिपूजनं
अग्निस्थापनं देवतास्थापनादि कर्माहं करिष्ये १

॥१॥ श्रीगणेशाय नमः ॥ अथ बौधायनोक्त लिंग प्रतिष्ठा विधिः ॥ तत्रादौ
कालमाह विष्णुधर्म्मोत्तरे ॥ चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ॥
माघे वा सर्व देवानां प्रतिष्ठा शुभदा सिते ॥१॥ रिक्तान्य तिथिषु सास्या वारे
भौमान्यके तथा ॥ माधवो वैसाखः माघोऽत्र शिवादि प्रतिष्ठापरः ॥ विष्णु प्र
तिष्ठातु माघे न भवति ॥ माघे कर्त्तु विनाशः स्यात् फाल्गुने शुभदा सितेति वि
ष्णु प्रतिष्ठा प्रकरणे उक्तत्वादिति हेमाद्रिः सितेशुक्लपक्षे इति केचित ॥ त्रि
विक्रमस्तु कृष्णपक्षे विभागे तु प्रथमे स्यात्कुभावहः ॥ मध्याद्द्वितीयभा
गे तु तृतीये कर्तृ नाशिनी ॥२॥ शुक्ले त्रिभागे प्रथमे देशनाशाय कीर्तिता ॥१॥

द्वितीये मध्यफलदा तृतीये च शुभावहा ॥ विष्णुधर्म्मोत्तरे त्रितीये यन्ने
न पुष्य चंद्रार्कति यय उच्यते न शुक्लपक्ष इत्याह ॥ अथ नक्षत्राण्युक्तानि
तत्रैव मात्स्ये ॥ आषाढ द्वे तथा मूल मुत्तरा त्रयमेव च ॥ ज्येष्ठा श्रवणा रो
हिण्यः पूर्वाभाद्रपदा तथा ॥ हस्ताश्विनी रेवतीच्च पुष्या मृगशिरस्त
था ॥ अनुराधा तथा स्वाती प्रतिष्ठासु प्रशस्यते ॥ नृसिंह पुराणेऽपि ॥
तथा महाश्विनो मास उत्तमः सर्वकामदः ॥ देवतात्र सदा शक्रः पांशुना
पि प्रतिष्ठितः ॥ भवतेफलदः पुंसां कर्कस्यैव दिवाकरे ॥ नीतिष्यिन्नि च नक्ष
त्रं नोपवासोत्र कारणं मातृ भैरव वाराह नारसिंहास्त्रिविक्रमः ॥ महिषासु
र हं त्र्यम्बक स्थाप्या वै दक्षिणायने ॥ मातृ भैरव इत्यत्र देवभैरव वाराह इत्य

सर्वेषु धर्म
कृत्येषु पत्नी
दक्षिणतः स
॥२॥ दा ॥

शांतिकेषु च सर्वेषु प्रतिष्ठोद्यापनादिषु वामे ह्युपविशेत्पत्नी ॥ व्याघ्रस्य वचनं यथा ६

पिपाठे वर्त्तते ॥ तेन देवशब्देन महादेवः भैरव पद सामानाधिकरण्यात् इ
ति ॥ मुहूर्त्तात् पूर्वं ॥ भूमिशुद्धिपूर्वकं मण्डपं कृत्वा मण्डपमध्ये वेदीं विधा
य वेद्यादि क्रमेण नवकुण्ड विधानं ॥ पञ्च कुण्ड विधानं ॥ एक कुण्ड विधा
नं वा कृत्वा वेद्यां लिङ्गतोभद्रं कृत्वा ॥ सत्त्व रज तामसैः द्रव्यैः सुशोभितं ॥
ध्वजा पताका तोरण चामर दण्ड वितानादिभिः मण्डपं सुशोभितं कृत्वा ॥
सुमुहूर्त्ते स्थापनं कुर्यात् ॥ तत्राऽयं क्रमः ॥ यजमानः सपत्नीकः सुस्नातः
रव्यातपसित पाद पाणिः शुचिरलङ्कृतः ॥ तं नित्यक्रियो धर्म्मिष्ठः ब्राह्मणैः
समेतो मण्डपाद्बहिः रुपविश्य ॥ सुमुखश्चेत्यादि गणपति स्तुत्या तिथ्या ॥५॥
दि संकीर्त्यः ॥ मयाचरितगणपति पूजा विधौ यन्न्यूनातिरिक्तं तत्सर्वं प-

र्णमस्तु ॥ अस्तु परिपूर्णमिति प्रत्युक्ते ॥ अनेन गणपति पूजन कर्म्मणा नि
र्विघ्न फलसिद्धिरस्तु ॥ अस्तु निर्विघ्न फलसिद्धिः ॥ इति गणपति पूजा ॥ अ
मुक देवता पूजन विधौ यन्न्यूनं यदतिरिक्तं तत्सर्वं ब्राह्मण वचनात श्री वि
ष्णो प्रसादात्परि पूर्णमस्तु ॥ अस्तु परिपूर्णं ॥ मण्डप देवता प्रतिष्ठा सु ॥ सी
मंतोपनयनान्न प्राशन चूडाकरणोपनयने वेदारम्भे केशांतं व्रतविसर्गे वि
वाहेषु कार्याः ॥ तत्रैव मण्डपत्वात ॥ तदुक्तं पारस्कर गृह्ये पञ्चसु वहिःशा
लायां विवाहे चूडाकरणे उपनयने केशांते सीमंतोपनयनमिति ॥ मण्डपस्तम्भ
निवेशनं ॥ वृषराशित्रये स्थित्वा सूर्य्येसति आग्नेयां कार्य ॥ सिंहादित्रये ईशान्यां
वृश्चिकादित्रये वायव्यां ॥ कुम्भादित्रये नैऋत्ये कार्यं ॥ इति स्तम्भ मण्डप देवता ॥

नारदः ॥ द्रव्यार्थ हीनाकर्तारं मंत्रहीनात ऋत्विजं
हिंसां ब्रह्मण हीनात्तुन प्रतिष्ठासमो रिपुः ॥

चन्द्रानुकूले उत्तमादि ॥ शुभतिथौ पूर्वस्युः पूर्वान्हे ब्राह्मणान् आहूय मास-
पक्षाद्युल्लिख्य अस्यां मूर्त्तौ देवकला सान्निध्यार्थे मम शाश्वत अस्यां मू
र्त्तौ देवस्य सान्निध्य सिध्यर्थे दीर्घायु लक्ष्मी सर्वकाम समृद्ध्य क्षय्य कामो
अमुक मूर्त्ति प्रतिष्ठां करिष्ये इति ॥ ब्रह्मलोक कामनया श्रीपरमेश्वर प्रीत्यर्थं लिं
ग प्रतिष्ठां करिष्ये ॥ अक्षय्य सुख कामोवा ॥ ईश्वर प्रीति कामोवा ॥ इति संक
ल्प्य गणेश पूजन पुण्याह वाचनादि नांदी श्राद्धान्त कृत्वा ॥ आचार्य्यं वृत्वा
प्रार्थनां कुर्य्यात ॥ मंत्र मूर्त्ति भवान्नाथ संसारो च्छेद कारकः ॥ देवः पूजार्ह
यथास्यां कुरुधर्म्मा दुर्गं चन ॥ संसार भय भीतेन अयं यज्ञ समारब्धः ॥ प्रा
रब्धस्त्वत्प्रसादेन निर्विघ्नं मे भवत्विदमिति ॥ अस्मिन्महोत्सवे यज्ञे ऋत्

नांप्रवरे शुभे ॥ सदाशिव प्रतिष्ठायां त्वमाचार्य्यो भवद्विजेति ॥ तथैव ऋत्विजो वृत्वा सदस्यञ्च वृणुयात् ॥ सदस्य प्रार्थना ॥ भगवन् सर्वधर्म्मज्ञ सर्वधर्म्मभृताम्वर ॥ विततं मम यज्ञेऽस्मिन् सदस्यो भव सुव्रत ॥ ततः आचार्यः ॥ यदत्र संस्थितं स्थानमाश्रित्य सर्वदा ॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥ अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ २ ॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशं सर्वेषामविरोधेन इदं कर्म्म समारभेत ॥ ३ ॥ भूत प्रेत पिशाचाद्या अपक्रामन्तु राक्षसा ॥ स्थानादस्माद्व्रजंत्वन्यत्र स्वीकरोमि भुवं त्विमाम् ॥ ४ ॥ इति मंत्रेण सितसर्षपादीन् सर्वदिशान् विकीर्य्य ॥ ततः कृतांजलिः ॥ शुचौर्वा भूत्वा ॥ स्वस्त्ययनमिति मंत्रद्वयं पठि[illegible]त्वा ॥ ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः

॥४॥

स्वस्तिन स्तार्क्ष्यो ऽरिष्ट नेमिः स्वस्तिनोवृहस्पतिर्दधातु ॥ इति ॥ देवा आयां

तु यातुधाना अपयांतु ॥ विष्णोर्देवस्य यजनं रक्षस्व ॥ ततः अपरान्हे तथा

रात्रौवाधिवासनमिष्यते इतिशौनकादिवाऽधिवासनं पक्षेभवति इतिके

चित ॥ इतिजीवदेव ॥ पूर्व रात्रौ ॥ निरंरां ॥ ततः आचार्यः निशायां पञ्च

गव्येन हिरण्य दूर्वांकुर यवाश्वत्थ पलाश पर्णमिश्रोदकेन लिङ्गमभिषिं

चति ॥ पञ्चामृतेन तन्मंत्रैः संस्नाप्य ॥ ॐ आपोहिष्ठामयो भुव स्तान ऊ

र्जे दधातुनो महेरणाय चक्षुषे योवः शिवतमो रस स्तस्य भाजयतेह नः

उसतीरिव मातर स्तस्मा ऽरङ्ग मामवो यस्यक्षयाय जिन्वथ आपोजन य

थाचनः इतितृभिः ३ हिरण्यवर्णा इतिचतसृभिः ॥ पावमानः सुवर्जनइत्य

नुवाक्येन ॥ व्याहृतिभिश्च ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः

॥४॥

ॐ सत्त्वं ॥ इति ततः पुष्पफलयवाक्षत दुर्वाङ्कुरान गृहीत्वा पादपीठे नम

स्तेरुद्र मन्यव इति निक्षिप्य ॐ नमस्तेरुद्र मन्यव उतोत इषवे नमः ॥ वा

हुभ्या मुतते नमः इति मंत्रेण ॥ तत्र लिङ्गं स्थापयित्वा ॥ रक्षोहणं वलगहनं

वैस्नवी मिहाद मतं वलग मुत्किरामि ॥ यंमेनिष्ठ्यो सयंम माल्यो निचषा

नेतं वलग मुत किरामि ॥ यदावध्नं दाक्षायणाय हिरण्यं शतानीकायसु

मनस्य माना तन्मंत्रावध्नामि शत शरदा पुष्मान जरदष्टि र्यथासाम् ॥ इ

तिमंत्रेण प्रतिसर सूत्र वद्धा संपूज्य वाससा कुशै रक्षाच्छ ॥ अवृत्तेहे उ इति

ॐ उदुत्तमं वारुण पास मस्म दवाधमं विमध्यमं यज्ञथं अथाय मर्यायन

य मादित्यव्रते तवा नागसो मादितये स्याम ॥ इति मंत्रेण जलेऽधिवासैनि ५२

सद्योवध्यिवासयेत ॥ द्वितीयेन्हि लिङ्ग तोभद्रस्य प्रतिद्वारं कलशद्वयं

॥५॥ स्थापयित्वा ॥ ऋत्विजो लिङ्गमुत्थापयेयुः उत्तिष्ठ ब्रह्मणस्पत इति ॥ वौद्ध
यनमूर्ण्या रुं वाचयित्वा ॥ स्वागतं देव देवेश विश्वरूप नमोस्तु ते ॥ शुद्धोपल
दधिस्नानि शुद्धं कर्म्मः सदाशिव ॥ वाल्मीक मृत्कषायै रनुलिप्य शुद्धोदके
न स्नापयेत ॥ क्षीर दधि घृतानां पलानि गायत्र्या गोमूत्रं ॥ ॐ भूर्भुवः स्वः
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात ॥ इति गो
मूत्रं ॥ गंधद्वारेति गोमयम ॥ ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम ॥ इति गोमयम ॥ ॐ पयः पृथि
व्यां पय ओषधीषु पयो दिव्यं तरिक्षे पयोधाः पयः स्वतीः प्रदिशः संतु म
ह्यम ॥ इति पयः ॥ दधि क्राव्णो अकारिषं जिष्णो रश्वस्य वाजिनः सुर
भिनो मुखाकरत प्रण आयुंषि तारिषत ॥ इति दधिस्नानं ॥ घृतस्व घृ ॥५॥

त पावनः पिवतवसां वसापावानः पिवतां तरिक्षस्य हविरसिस्वाहा ॥ दिशः
प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ॥ इतिघृतस्नानं ॥ ॐ देवस्य
त्वासवितुः प्रसवे श्विनोर्वाहुभ्यां पूष्णो हस्ताभ्यां ॥ इतिकुशोदकम् ॥ प्रणवे
नालोडनं ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॥ इ
ति मंत्रेण पञ्चगव्येन ॥ ततः पञ्चामृतस्नानम् ॥ नमस्ते रुद्र मन्यव इति ष
ड्भिरध्यायैर्वा मंत्रैस्नापयित्वा ॥ शमी पलाश खदिर विल्वाश्वत्थ वैकंकत न्य
ग्रोध पनसाम्र शिरीषोदुंबर वृक्षाणां त्वक्कषाय कुशोदकेनाभिषिंचेत्त श्वस्थे
वोनिषदनमिति मंत्रेण ॥ ॐ नमस्तेरुद्र मन्यवऽउतोतऽइषवेनमः वाहुभ्यां
मुततेनमः ॥ १ ॥ यातेरुद्र शिवातनूरघोरा पापकाशिनी ॥ तयानस्तन्वा शन्त

॥६॥ मयागिरिशन्ताभिचाकशीहि॥ यामिषुङ्गिरिशंत हस्ते विभर्ष्यस्तवे: शिवाङ्गि:
रित्रताङ्कुरु माहिᳫंसीः पुरुषञ्जगत॥ शिवेनवचसा त्वागिरिशाच्छावदामसि।
यथानः सर्वमिज्जगदयक्ष्मᳫंसुमना असत॥४॥ अध्यवोचदधिवक्ता प्रथमो
दैव्योभिषक॥ अहींश्च सर्वाञ्जम्भयन्सर्वाश्च यातुधान्योधराचीः परासुव॥५॥
असौयस्ताम्रोऽअरुणऽउतवभ्रुः सुमङ्गलः॥ येचैनᳫंरुद्राअभितोदिक्षुश्रि
शो ताः सहस्रशोवैषाᳫंहेडईमहे॥६॥ असौयोवसर्पति नीलग्रीवो विलोहितः॥
उतैनङ्गोपा अदृशन्नदृशन्नुदहार्य्यः सदृष्टोमृडयातिनः॥७॥ नमोस्तुनील
ग्रीवाय सहस्राक्षाय मीढुषे॥ अथोयेअस्य सत्वानो हन्तेभ्योकरन्नमः॥ इति
ॐ अश्वत्थेवो निषदनम्पर्णेवो वसतिष्कृता॥ गोभाज इत्किलासथयत्सनवथ ॥६॥

पुरुषं ॥ इतिमंत्रेण ॥ मणिमुक्ताप्रवालोदक सुवर्णेनाभिषिञ्चति ॥ हिरण्यवर्णा

इतिकलशेनाभिषिंच्य ॥ अग्निःसप्तमिनिलोह टंकोत्तारणार्थे केचिदाहुः ॥ लि

ङ्गपीठत्तरे निवेश्य युयंवस्त्राणि इतिवस्त्र युग्मं ॥ गंध पुष्पाक्षत धूपदी

पनैवेद्यैःसंपूज्य ॥ आचार्य्यतैजस पात्रस्थं मधु सुवर्ण सलाकया गृही

त्वा नेत्रोन्मीलनं कुर्य्यात ॥ तत्रादौवलिं प्रदिश्य ॥ हिरण्यगर्भ इत्यष्टाभिर्दी

पान प्रदर्श्य वलौस्थापयित्वा आदर्शञ्च प्रदर्शय पश्चात्सुवर्ण शलाकया

चित्रं देवाना मुदगादनीकं इतिमंत्रेण स्वयं पार्श्वे स्थित्वा सतर्प्य घोष मेवै

कं नेत्रंसमञ्ज्योन्मीलयेत ॥ ॐ चित्रं देवाना मुदगादनीक चक्षुर्मित्रस्य व

रुणस्याग्नेः ॥ आप्राद्यावा पृथिवी अन्तरिक्षं सूर्य्य आत्मा जगतस्तस्थु

॥७॥ षड्व ॥ इति मंत्रेण ॥ तदानकश्चित्पुरतस्थिषन् ॥ ॐ नमो भगवते रुद्राय हि
रण्यरेतसे परय परमात्मने विश्वरूपायो माप्रियाय नमः ॥ इति संल्लिख्य
अङ्गुल्त्विव्वेगिन मधव्रजनं कार्य्यं ॥ नसमज्यो ल्मिलनं वारा ल्लिङ्गेषु इति केचि
त् ॥ आचार्य्याय धेनुं दद्यात् ॥ ततः देवमुत्थाप्य कुश प्रस्तरे शुभवस्त्रेणाच्छा
द्य प्राक्शिरसं देवं स्थापयेत् ॥ प्रजापत्यो यं गुरुर्तोस्तु इत्युक्त्वा ॥ ततः आचा
र्य्यायः उपलेपनाद्य वरुनामा अग्नि प्रतिष्ठापनांतं कृत्वा अन्वाधानाय ॥
रो७ यजुर्वेदे अन्वाधानं नकैत्ति ॥ समिध चरु तिलाज्येति अन्वाधानार्थे ॥ अ-
ग्नेरुत्तरत शांति कलश स्थापनं ॥ अत्र प्रधानं श्रीरुद्रं ॥ यात इषुः शिवतमे- ॥७॥
त्याद्यनुवाकेन द्रापे अंधसस्पते ॥ ॐ द्रापे अंधसस्पते दरिद्र नीललोहित-

आसां प्रजाना मेषां पशूना मामे म्मारोङ्‌ मोम्वनः किञ्चनाममत् ॥ ह
सहस्राणि ॥ ॐ सहस्राणि सहस्रो वाह्वो स्तव हेतवः ॥ तासामीशानो भग
वः पराचीना मुखा कृधि ः इति मंत्रेणेत्यनुवाकाभ्यां प्रति मंत्र प्रत्यमृच्च प्र
ज्पेन भवादि देवता ॥ तिलोदनेन गुडोदन ॥ हरिद्रोदना हुतिभिस्त्र ॥ शेषे
णास्विष्टकृतं ॥ आज्याहुति हुत्वा सर्वे वै रुद्र इति लिङ्‌ मूलं स्पृशेत ॥ पु
नः स्ताभिर्हुत्वा कंड द्रायेति मध्यं स्पृशेत ॥ पुनस्ताभिर्हुत्वा ॥ ॐ नमो हि
रण्यवाहवे शेनान्ये दिशाञ्च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां
पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो हरिकेशा
योपवीतिने पुष्टानां पतये नमो नमः ॥ इति मंत्रेणाग्रं स्पृष्टु ॥ पुनस्तैभि
र्हुत्वा रुद्रेण संपूर्णेन सर्वं स्पृशेत ॥ ॐ भवाय देवाय स्वाहा ॥ इति मंत्रेणा हो

॥८॥ तिलौदनेन॥ ॐ भवस्य देवस्य पत्न्यै स्वाहा इति मंत्रेणाष्टौ गुडौदनेन॥ भ
वस्य देवस्य सुताय स्वाहा॥ इति मंत्रेणाष्टौ हरिद्रौदनेन॥ ॐ त्र्यम्बकं यजा
महे सुगन्धिं पुष्टिवर्द्धनम्॥ उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृ
तात्॥ इति मंत्रेणाष्टोत्तरशतं॥ अष्टादशभिर्मिश्रित हविस्त्रयेण॥
शेषेण स्विष्टकृत मित्यादि॥ आज्यभागान्तं हुत्वा प्रधान होमः॥ ॐ उ
दुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्यम्॥ इति मंत्रेण उ
त्थाप्य॥ सद्योजातमिति पञ्चानुवाकैः देवालयं प्रविश्य मणिमुक्ता प्रवाल
सुवर्ण रजतानि गर्त मध्ये स्थापयित्वा॥ ॐ नमस्ते रुद्र मन्यव उतोत इषवे
नमः बाहुभ्यामुत ते नमः॥ इति मंत्रेण लिङ्गं स्थापनं॥ अथ गंधादीना पं
कारणेन मुखाग्निं कृत्वोत्थापनावाहनं करोति॥ ॐ भूः पुरुषमावाहयामि॥ ॥८॥

स्वंभुव:॥ एवंस्व:॥ भूर्भुव: स्व: पुरुषं॥ क्वोदेवंस्पृष्टा इहैववधीति चतस्र ऋचो जपित्वा प्रणवेन कृताङ्गन्यास:॥ प्रैणप्रतिष्ठां कुर्यात्॥ ॐ अस्य श्री प्राण प्रतिष्ठा मंत्रस्य ब्रह्म विष्णु महेश्वरा ऋषय:॥ ऋग्यजु: सामानि छंदांसि परा प्राण शक्तिर्देवता आँ बीजं क्रौं कीलकं ह्रींशो श क्ति: प्राणप्रतिष्ठापने विनियोग:॥ ततोभूतशुद्धिं कृत्वा॥ ॐ अं कं खं गं घं ङं आं पृथिव्यप्तेजो वाय्वाकाशात्मने॥ अंगुष्ठाभ्यांनम:॥ ॐ इं चं छं जं झं ञं ई शब्दस्पर्श रूपरसात्मने तर्जनीभ्यांनम:॥ ॐ टं ठं डं ढं णं उं श्रो त्रत्वक् चक्षुर्जिव्हा घ्राणात्मने मध्यमाभ्यांनम:॥ ॐ एं तं थं दं धं नं ऐं वाक् पाणि पाद पायु पस्थाने॥ अनामिकाभ्यांनम:॥ ॐ ओं पं फं वं-

ॐ

॥८॥ भं मं औं वचनादान गमनविसर्गानादानात्मने कनिष्ठिकाभ्यां नमः॥
ॐ अं यं रं लं वं शं षं सं हं ळं अः बुध्य हंकार चित्ता ऽव्यक्तात्मने करतल
कर पृष्ठाभ्यां नमः॥ एवं हृदयादि॥ ॐ अं कं खं गं घं ङं आं पृथिव्यप्ते
जो वाय्वाकाशात्मने नमः हृदयाय नमः॥ ॐ इं चं छं जं झं ञं ईं शब्दस्प
र्शरूपरसात्मने नमः शिरसे स्वाहा॥ ॐ उं टं ठं डं ढं णं ऊं श्रोत्र त्वक् च
क्षुर्जिह्वा घ्राणात्मने शिखायै वषट्॥ ॐ एं तं थं दं धं नं ऐं वाक्पाणि
श्रीः पाद पायू पस्थात्मने कवचाय हुं॥ ॐ पं फं बं भं मं औं प्राणापाने व्याना
दान समानात्मने नेत्रत्रयाय वौषट्॥ ॐ यं रं लं वं शं षं सं हं ळं अः बु
ध्य हंकार चित्ता ऽव्यक्तात्मने नमः अस्त्राय फट्॥ अथ ध्यानं॥ रक्ताम्बो
धिस्थ पोतोल्लस दरुणसरोजाधिरूढा कराब्जैः पाशांकोदण्ड मिक्षुभ ॥९॥

वमभय ग्रणमप्यंकुशं पञ्चवाणान् ॥ बिभ्राणा सृक्कपालं त्रिनयनलसि
तापीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा
न ॥ इति ध्यात्वा जपेत् ॥ ॐ आं ह्रीं क्रों यं रं लं शं षं सं हं क्षं हं सः सोहं
लिङ्गस्य प्राणा इह प्राणाः ॐ आं ह्रीं क्रों यं रं लं शं षं सं हं लं क्षं हं सः
सोहं लिङ्गस्य जीव इह स्थितः ॥ ॐ आं ह्रीं क्रों यं रं लं शं षं सं हं लं क्षं
हंसः सोहं लिङ्गस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्र जिह्वा घ्राण प्रा
णा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ अस्यै प्राणा प्रतिष्ठंतु ॥ अस्यै
प्राणा रक्षंतु ॥ अस्यै लिङ्गत्व मर्चायै स्वाहा ॥ इति प्राण प्रतिष्ठां कृत्वा ॥
इति प्राण प्रतिष्ठा मंत्रेण सजीवं ध्यायेत् ॥ यजमानः लिङ्गस्य दक्षि
ण करें गायत्रीं जपेत् ॥ तत्र शिवगायत्रीं जपेत ॥ ॐ तत्पुरुषाय वि

॥१०॥ द्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ इति ॥ स्वागतं देव देवे
श मद्भाग्यात्त्वमिहागतः मानिरूप्य सर्वदा देव लिङ्गेस्मिन् परिकल्पय ॥
ततो रत्नैरम्बु कलशेन अभिषिंचयति ॥ प्रणवेन कूर्चासनं दत्वा ॥ दूर्वा
विष्णुक्रान्ता श्यामाक पद्मपत्र कलशेन पाद्यं ॥ एलालवंगकर्पूर मिश्रो
दकेन आचमनं ॥ आपः क्षीर कुशाग्रे रक्ततैर्यवैस्तिलै र्दूर्वाभिः अर्घ्यं ॥
इमा आपः शिवाः शिवतमाः पूता पूततमा मेध्यामेध्यतमा अमृताअ
मृतरसाः पाद्यास्ता जुषंतां प्रतिगृह्णंतां प्रतिगृह्णन्तु ॥ भगवान् महा
रुद्राय वै नमो नमः ॥ स्नान पर्य्यन्तं मंत्रावृत्तिः ॥ नमोस्तु नीलग्रीवाय स
अर्घ हस्राक्षाय मीढुषे ॥ अपोये ऽस्य सत्वानो हन्तेभ्यो करन्नमः ॥ इतिमं
त्रेण प्रतिसर सूत्रेण विसंस्य ॥ नमस्कृत्य ॥ इमे गंधाः शुभा दिव्याः स ॥१०॥

र्वगंधैरलंकृताः ॥ पूताब्रह्म पवित्रेण पूता सूर्यस्य रश्मिभिः ॥ प्रतिगृ
ह्यतां प्रतिगृह्णातु ॥ भगवान् महादेवो रुद्राय वै नमो नमः ॥ गंधं दत्त्वा ॥
इमे माल्या शुभा दिव्याः सर्व पुष्पै रलङ्कृताः ॥ पूता ब्रह्म पवित्रेण पूता
सूर्यस्य रश्मिभिः ॥ प्रतिगृह्यतां प्रतिगृह्णातु ॥ माल्य पुष्पाणि ॥ वन
स्पति रसो धूपो धूपेभ्यो धूपरुत्तमः ॥ आघ्रेयः सर्व देवानां धूपोयं प्रति
गृह्यतां प्रतिगृह्णातु ॥ भगवान् महादेवो रुद्राय वै नमो नमः ॥ इति धू
पं ॥ ज्योतिः शुक्रश्च तेजश्च देवानां सततं प्रियः प्रभाकरो महातेजो दीपोयं प्र
तिगृह्यतां प्रतिगृह्णातु ॥ भगवान् महादिव्यो रुद्राय वै नमो नमः ॥ इति
दीपं ॥ परमान्नेन गुडौदनेन आज्यौदनेन नाना भक्ष्योपहारादिना ॥ पवित्रं

॥११॥ ति विनत न्मिति नैवेद्यं ॥ तांबूल दक्षिणा नीराजनं ॥ पुष्पांजलिं गृहीत्वा ॥ ॐ
नमो भवाय देवाय नमः ॥ ॐ सर्वाय देवाय नमः ॥ ॐ ईशानाय देवाय नमः ॥
ॐ पशुपतये देवाय नमः ॥ ॐ रुद्राय देवाय नमः ॥ ॐ उग्राय देवाय नमः ॥
ॐ भीमाय देवाय नमः ॐ महते देवाय नमः ॥ एभिः अष्टाभिः नाममन्त्रेण
पुष्पाञ्जलिं दत्त्वा ॥ एतैरेव मंत्रैः तर्पयित्वा ॥ ॐ भवं देवं तर्पयामि ॥ ॐ सर्वं
देवं तर्पयामि ॥ ॐ ईशानं देवं तर्पयामि ॥ ॐ पशुपतिं देवं तर्पयामि ॥ ॐ रु
द्रं देवं तर्पयामि ॥ ॐ उग्रं देवं तर्पयामि ॥ ॐ भीमं देवं तर्पयामि ॥ ॐ महान्तं
देवं तर्पयामि ॥ ततस्तिलोदनेन गुडोदनेन हरिद्रोदनेन हविषि ॥ ॐ भ
वाय देवाय नमः स्वाहा ॥ १ ॥ ॐ सर्वाय देवाय नमः स्वाहा ॥ २ ॥ ॐ ईशानाय
देवाय नमः स्वाहा ॥ ३ ॥ ॐ पशुपतये देवाय नमः स्वाहा ॥ ४ ॥ ॐ रुद्राय दे ॥११॥

वायनमः स्वाहा ॥५॥ ॐ उग्रायदेवायनमः स्वाहा ॥६॥ ॐ भीमायदेवाय
नमः स्वाहा ॥७॥ ॐ महतोदेवायनमः स्वाहा ॥८॥ इत्यष्टभिः तिलोदनेन
हुत्वा ॥ ॐ भवस्य देवस्य पत्न्यैनमः स्वाहा ॥१॥ ॐ सर्वस्य देवस्य पत्न्यैन
मः स्वाहा ॥२॥ ॐ ईशानस्य देवस्य पत्न्यैनमः स्वाहा ॥३॥ ॐ पशुपते-
र्देवस्य पत्न्यैनमः स्वाहा ॥४॥ ॐ रुद्रस्य देवस्य पत्न्यैनमः स्वाहा ॥५॥ ॐ
उग्रायदेवस्य पत्न्यैनमः स्वाहा ॥६॥ ॐ भीमस्य देवस्य पत्न्यैनमः स्वा-
हा ॥७॥ ॐ महतो देवस्य पत्न्यैनमः स्वाहा ॥८॥ इति गुडोदनेन हुत्वा ॥
ॐ भवस्य देवस्य सुतायनमः ॥१॥ ॐ सर्वस्य देवस्य सुतायनमः स्वाहा
॥२॥ ॐ ईशानस्य देवस्य सुतायनमः स्वाहा ॥३॥ ॐ पशुपतेर्देवस्य सु-

तायनमः स्वाहा ॥४॥ ॐ रुद्रस्य देवस्य सुताय नमः स्वाहा ॥५॥ ॐ उग्रस्य
देवस्यसुतायनमः स्वाहा ॥६॥ ॐ भीमस्यदेवस्य सुतायनमः स्वाहा ॥७॥
ॐ महतो देवस्य सुतायनमः स्वाहा ॥८॥ त्रीणि हवींष्येकी कृत्य जुहुयात ॥
ॐ त्र्यम्बकं यजामहे सुगंधिं पुष्टिवर्द्धनम् उर्व्वारुकमिव वन्धनान्मृत्यो
र्मुक्षीय मामृतात स्वाहा ॥१॥ मानो महांत मुतमानो अर्भकम्मानो उक्षन्त
मुतमान उक्षितम् ॥ मानोवधीः पितर म्मोतमातरम्मानः प्रियास्तन्वो रुद्र
रीरिषः स्वाहा ॥२॥ मानस्तोके तनये मान आयुषिमानो गोषुमानो अश्वे
षु रीरिषः मानोवीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे
स्वाहा ॥३॥ अराते गोघ्नो ॥४॥ विकिरिद्र विलोहित नमस्ते अस्तुभगवः

यास्तेसहस्रं हेतयोन्यमस्मिन्निवपन्तुताः स्वाहा ॥ ॐ सहस्राणिसह
स्रशो वाहवोस्तव हेतयः ॥ तासामीशानो भगवः पराचीना मुखा कृधिः स्वा
हा ॥६॥ इति षड्भिर्हुत्वा ॥७॥ नाममंत्रेण जुहुयात ॥८॥ ॐ शिवायनमः
स्वाहा ॥१॥ ॐ शंकरायनमः स्वाहा ॥२॥ ॐ सहमानायनमः स्वाहा ॥
३॥ ॐ शितिकंठायनमः स्वाहा ॥४॥ ॐ कपर्द्दिनेनमः स्वाहा ॥५॥ ॐ
ताम्रायनमः स्वाहा ॥६॥ ॐ अरुणायनमः स्वाहा ॥७॥ ॐ अपगुरुमा-
णायनमः स्वाहा ॥८॥ ॐ हिरण्यवाहवेनमः स्वाहा ॥९॥ ॐ शिष्पिंज
रायनमः स्वाहा ॥१०॥ ॐ वभ्लुशायनमः स्वाहा ॥११॥ ॐ हिरण्यायन
मः स्वाहा ॥१२॥ इति नाममंत्रेण जुहुयात ॥ ततः स्विष्टकृदादि होमशेषं

समाप्य हविः शेषेणाहुतेन लिङ्गाय बलिंदेयः ॥ तत्रमंत्रः ॥ त्वमेव माद्यं पु
रुषं प्रमाणं रुद्रं शिवं विश्व सृजं यजा महे ॥ त्वमेव यज्ञो विहितो विधेय-
स्त्वमात्मना प्रति गृह्णीष्व हव्यम ॥ ततः अश्वत्थ पर्णेषु अग्रेणाग्निं
अवशिष्टं हुत्वा तत शेषं निदधाति सर्वो वै रुद्र इति भूर्भुवः स्वरोमिति त्रि
हुत्वा बलिमुपहरेत ॥ आचम्य ॥ अग्ने नयेति प्रदक्षिणा त्रि चतुर्वा सहा
ग्निं ॥ विश्वभुजे नमः ॥ १ ॥ सर्वभुजे नमः ॥ २ ॥ आत्मने नमः ॥ ३ ॥ पर
मात्मने नमः ॥ इति नमस्कृत्य लिङ्ग प्रतिष्ठार्थं द्वादश ब्राह्मणान भोज
यिष्ये ॥ देवं प्रणिपत्य प्रार्थयेत ॥ यव चन्द्रावनी सूर्यो स्तिष्ठंत्य प्रतिघा
तिनः ॥ तवत्त्वयात्र देवेश स्थेयं भक्तानुकम्पया ॥ ततो नाम करणं ॥ क

॥१४॥ तं नाम पुत्रं देवस्य नाम करणं कुर्य्यात् ॥ शिवस्य अमुकेश्वरः ॥ तन्तन्त्रो
देवस्योत्तर पूजां कृत्वा ॥ आचार्य्याय गां दत्वा ॥ बृह्मणे वृषभं ॥ सदस्या
श्वं ॥ ऋत्विग्भ्यो यथा शक्ति दक्षिणां दत्वा ॥ पुण्यं ता वाचयेत् ॥ ततो मण्ड
पदेवता अग्निं विसृज्य विसृं स्मरेत् ॥ इति बौधायन सूत्रोक्त लिङ्ग-
स्थापन विधि समाप्तः ॥ शुभमस्तु ॥ श्री संवत् १ ८ ८ ८ मार्गशीर्षशु
क्र नवम्यां भौमवासरे ॥ ॐ शिवायनमः ॥ लिखितं पं॰ देवाचरण त्रिपाठिना ॥
मानोर्द्ध रत्निः स्यात् शत परिमिते ऽरत्निर्वितत ॥ सहस्रे हस्तं स्या दयुत हव
ने हस्त युगलं ॥ चतुर्हस्तं लक्षे प्रयुत हवने षट् करमिते ॥ ककुब्भिर्वा कोटौ
नृपकर मपि प्राहुरपरे ॥ कृतमुष्टिकरो रत्निररत्निरकनिष्ठिका । यवो
यूकाच लिक्षाच्च वालाग्रं चैवमादयः ॥ दशाहायमे ७४ अङ्गुल ॥ चारहायमे ५७ ॥१४॥
अङ्गुल ॥ प्रयुत दशलक्ष ॥ कोटिमे दशहस्त ॥

॥ इति बौधायनोक्त लिङ्गस्थापन प० ॥